**विद्या भवन बालिका विद्यापीठ लखीसराय**

**वर्ग दशम् विषय संस्कृत शिक्षक श्यामउदय सिंह**

**ता:-२७/०७/२०२०(एन.सी.ई.आर.टी.पर आधारित प्रश्न)**

**सामयिक मूल्यांकन २०२०-२१ हेतु पुनरावृत्ति**

***अधोलिखितगद्यांशं पठित्वा तदाधारितानां प्रश्नानां उत्तराणि संस्कृतभाषया लिखत-**

अस्ति देउलाख्यो ग्राम:। तत्र राजसिंह:नाम राजपुत्र: वसति स्म।एकदा केनापि आवश्यकमारगकार्येण तस्य भार्या बुद्धिमती पुत्रद्वयोपेता पितुर्गृहम् प्रति चलिता ।मार्गे गहनकानने सा एकं व्याघ्रं ददर्श।सा व्याघ्रमागच्छन्तं दृष्ट्वा धार्ष्ट्यात् पुत्रौ चपेटया प्रहृत्य जगाद्-"कथमेकैकशो व्याघ्रभक्षणाय कलहं कुरुथ।अयमेकस्तावद्विभज्य भुज्यताम्।पश्चाद् अन्यो द्वितीय:

कश्चिल्लक्ष्यते।"

**एकपदेन उत्तरत-**

(i) राजसिंह: कुत्र वसति स्म?

(ii) राजसिंह: क: आसीत् ?

(iii) सा बुद्धिमती कुत्र एकं व्याघ्रं ददर्श?

(iv) बुद्धिमती पुत्रद्वयोपेता कुत्र चलिता?

**पूर्णवाक्येन उत्तरत-**

(i) सा पुत्रौ चपेटया प्रहृत्य किम् जगाद् ?

(ii) सा पुत्रौ कथम् चपेटया प्रहृत्य जगाद् ?

**भाषिककार्यम् –**

(i) 'जगाद् 'इति क्रियापदस्य कर्तृपदं किम्?

(ii) 'अयम्' इति पदम् कस्मै प्रयुक्तम् ?

(iii) 'भार्या'इति पदस्य विशेषणपदं किम्?

(iv) 'गच्छन्तम् 'इति क्रियापदस्य विपर्ययपदं गद्यांशेकिम् ।